१६

सृष्टिप्रलयविचारः

प्रस्तावना

सृष्टिविचारप्रसङ्गे अद्वैतवेदान्तवादिनां प्रधानं तत्त्वं तावद् अज्ञानतत्त्वम्। तस्या एव नामान्तराणि अविद्या माया अव्यक्तम् अव्याकृतं चेत्यादीनि। ननु किं नाम अज्ञानम् इति चेदुच्यते वेदान्तसारकृता - अज्ञानं हि सदसद्भ्याम् अनिर्वचनीयं, त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिद् इति। ईश्वरो हि अनिर्वचनीयामिमां त्रिगुणात्मिकां मायां स्वशक्तित्वेन आश्रित्य लीलया जगद्बिम्बरचनायै प्रवर्तते। ईश्वरस्य ईक्षणमात्रेण यद्यपि जगत् सृज्यते इत्यस्ति श्रुतिप्रसिद्धिः तथापि अस्ति वा सृष्टेः कश्चित् क्रमः अद्वैतवेदान्तसम्मतः इति जिज्ञासूनां दार्शनिकानां ज्ञानाय सृष्टिक्रमः प्रतिपाद्यते वेदान्तिभिः। सृष्टितत्त्विषये सांख्यानां प्रकृतिमहत्तत्त्वादिक्रमः सुप्रसिद्धः, न्यायवैशेषिकाणां च द्व्यणुकादिक्रमः। अद्वैतवेदान्तिनां कः सृष्टिक्रमः, के च सृष्टाः पदार्थाः इति विषयः ज्ञातव्यः।

उद्देश्यानि

इमं पाठं पठित्वा भवद्भिः -

- अद्वैतवेदान्तदर्शनस्य सृष्टितत्त्वविषये विस्तरेण परिचयः लभ्यते।
- अद्वैतवेदान्तसम्मतस्य सृष्टिक्रमस्य विषये ज्ञायते।
- सृष्टिक्रमविषये श्रुत्यविरोधः ज्ञायते।
- आकाशस्य सृष्टिः भवति न वेति ज्ञायते।
- पञ्चीकरणप्रक्रियायाः विस्तरेण परिचयः लभ्यते।
- प्रलयविषये विस्तरेण परिचयः लभ्यते।

१६.१) सृष्टिक्रमः

ब्रह्मणः एव जगत्सृष्टिः जायते इति अद्वैतवेदान्तसिद्धान्तः। परन्तु यथा अन्यदर्शनेषु सृष्टेः क्रमः अभ्युपगम्यते तथा अद्वैतवेदान्ते अस्ति वा कश्चित् क्रमः इति विचारणीयम्। वस्तुतः परमेश्वरस्य ईक्षणमात्रेण सृष्टिः जातेति तत्र क्रमो नानुसन्धेयः। परन्तु बह्वीषु श्रुतिषु सृष्टेः कश्चित् क्रमः आश्रीयते, सा च क्रमसृष्टिः साधारणजनानां बोधाय उपयोगिनी भवति इति कारणात् अद्वैतवेदान्ते सृष्टेः क्रमः विचार्यते। तैत्तिरीयोपनिषदि आत्मस्वरूपं विचार्य "सत्यं ज्ञानमनन्तं ब्रह्म" इति ब्रह्मणः स्वरूपलक्षणं निगद्य तदेव ब्रह्म सृष्टिकारणत्वेन प्रतिपादयितुं सृष्टेः क्रमः आम्नायते -

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः।

आकाशाद्वायुः। वायोरग्निः। अग्नेरापः।

अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्।" इति।

१६.१.१) सूक्ष्मभूतानि

इत्थम् अज्ञानोपहितचैतन्यात् अर्थात् ईश्वरात् प्रथमम् आकाशः उत्पद्यते। आकाशाद् वायुः, वायोः अग्निः उत्पद्यते, अग्नेः आपः उत्पद्यन्ते, अद्भ्यः च पृथिवी उत्पद्यते इति पञ्चभूतानां सृष्टिक्रमः। एतानि पञ्चभूतानि प्रथमतः सूक्ष्मरूपेण उत्पद्यन्ते, तदा च तानि परस्परेभ्यः पृथग्भूतानि भवन्ति। तदा तानि अपञ्चीकृतभूतानि तन्मात्राणि वेत्युच्यन्ते। तदा ते व्यवहारयोग्यानि न भवन्ति। ततः पञ्चीकरणप्रक्रियया पञ्चभूतानि परस्परं मिश्रितानि सन्ति व्यवहारयोग्यताम् आपद्यन्ते। ननु का नाम पञ्चीकरणप्रक्रिया इति चेत् पञ्चभूतानां परस्परमेलनेन भूतानां स्थूलरूपतापादनमेव पञ्चीकरणम्, तदग्रे विस्तरेण प्रतिपादयिष्यते।

अपञ्चीकृतेभ्यः पञ्चसूक्ष्मभूतेभ्यः स्थूलभूतानि, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च वायवः, बुद्धिः मनश्चेति उत्पद्यन्ते। श्रोत्रं, चक्षुः, त्वक्, जिह्वा, घ्राणं च इति पञ्च ज्ञानेन्द्रियाणि। वाक्, पाणिः, पादः, पायुः, उपस्थः चेति पञ्च कर्मेन्द्रियाणि। प्राणः, अपानः, व्यानः, उदानः, समानः चेति पञ्च वायवः।

१६.१.२) ज्ञानेन्द्रियाणि

ज्ञानेन्द्रियाणि आकाशादीनां पृथक् पृथक् सात्त्विकांशेभ्यः क्रमेण उत्पद्यन्ते। तथाहि सात्त्विकांशादाकाशात् श्रोत्रमुत्पद्यते, सात्त्विकांशाद् वायोः त्वगिन्द्रियम्, सात्त्विकांशात्तेजसः चक्षुः, सात्त्विकांशाज्जलात् जिह्वा, सात्त्विकांशायाः पृथिव्याश्च घ्राणेन्द्रियं क्रमेण उत्पद्यन्ते।

१६.१.३) कर्मेन्द्रियाणि

कर्मेन्द्रियाणि आकाशादीनां पृथक् पृथक् रजोंऽशेभ्यः क्रमेण उत्पद्यन्ते। तथाहि रजोगुणप्रधानाद् आकाशाद् वागुत्पद्यते, रजोगुणप्रधानाद् वायोः पाणीन्द्रियम्, रजोगुणप्रधानाद् अग्नेः पादेन्द्रियं, रजोगुणप्रधानात् जलात् पाय्विन्द्रियं, रजोगुणप्रधानायाः पृथिव्याः उपस्थेन्द्रियं च उत्पद्यते।

१६.१.४) मिलितानां सूक्ष्मभूतानां कार्याणि

पञ्च वायवः

पञ्च वायवः आकाशादीनां रजोंऽशेभ्यः मिलितेभ्यः उत्पद्यन्ते। क्रियाभेदेन एव तेषां भेदः, वायुत्वेन तु ते समानाः। ते हि प्राणः, अपानः, व्यानः, उदानः, समानः चेति। एतेषु ऊद्ध्र्वगमनशीलो नासाग्रस्थयी वायुः प्राणः इत्यर्थः। अधोगमनशीलः पाय्वाादिस्थायी वायुरपानः। सर्वनाडीगमनशीलः अखिलशरीरस्थायी वायुः व्यानः। ऊर्ध्वम् उत्क्रमणशीलः कण्ठस्थायी वायुः उदानः। शरीरमध्यगतानाम् अन्नरसादीनां नेता वायुः समानः। तथाहि उच्यते सदानन्दयोगीन्द्रेण वेदान्तसारे -

"प्राणो नाम प्राग्गमनवान् नासाग्रवर्ती। अपानो नाम अवाग्गमनवान् पाय्वादिस्थानवर्ती। व्यानो नाम विष्वग्गमनवान् अखिलशरीरवर्ती। उदानो नाम कण्ठस्थानीयः ऊद्ध्र्वगमनवान् उत्क्रमणवायुः। समानो नाम शरीरमध्यगताशीतपीतादिसमीकरणकरः। समीकरणं तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणम्" इति।

केचित् नाग-कूर्म-कृकल-देवदत्त-धनञ्जयाख्याः पञ्च अन्ये वायवः सन्ति इति वदन्ति। तत्र नागः उद्गिरणकरः, कूर्मः उन्मीलनकरः, कृकलः क्षुत्करः, देवदत्तः जृम्भणकरः, धनञ्जयः पोषणकरः। तथाह्युच्यते गोरक्षाशकते -

उद्गारे नाग आख्यातः कूर्मस्तून्मीलने स्मृतः।
कृकलस्तु क्षुधि ज्ञेयो देवदत्तो विजृम्भणे।
न जहाति मृतञ्चापि सर्वव्यापी धनञ्जयः॥ इति।

एतेषां प्राणादिषु अन्तर्भावात् प्राणादयः पञ्च एव इति केचित्।

अन्तःकरणम्

आकाशादीनां सात्त्विकांशेभ्यः मिलितेभ्यः अन्तःकरणम् उत्पद्यते। अन्तःकरणस्यैव वृत्तिभेदेन बुद्धिः मनः चित्तम् अहङ्कारः इति चतुर्धा विभागः। तथाहि उच्यते -

आकाशादिगताः पञ्च सात्त्विकांशाः परस्परम्।
मिलित्वैवान्तःकरणमभवत् सर्वकारणम्॥
तदन्तःकरणं वृत्तिभेदेन स्याच्चतुर्विधम्।
मनो बुद्धिरहङ्कारश्चित्तं चेति तदुच्यते॥ इति।

एतेषु मनो नाम संकल्पविकल्पात्मिका अन्तःकरणवृत्तिः। बुद्धिर्नाम निश्चयात्मिका अन्तःकरणवृत्तिः। अभिमानात्मिका अन्तःकरणवृत्तिः अहङ्कारः, स्मरणात्मिका अन्तःकरणवृत्तिः चित्तम् इति। एतासु वृत्तिषु बुद्धिमनसोरेव प्रसिद्धिः विद्यते। तस्माद् अनेके अहङ्कारं चित्तं च पृथक्त्वेन नाभ्युपगम्य बुद्धिमनसोरेव अन्तर्भावयन्ति। तस्माद् अन्तःकरणस्य द्विरूपतैव विद्यारण्यस्वामिना पञ्चदश्यां निगदिता -

तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तद् द्विधा।

मनो विमर्शरूपं स्याद् बुद्धिः स्यान्निश्चयात्मिका॥ इति।

अस्मिन् श्लोके मनसः विमर्शरूपता निगदिता। विमर्शो नाम विशेषरूपेण आलोचनं विचारो वा। स च विचारः इदम् इत्थं न वेति संकल्पविकल्पाभ्यां न पृथक्। तस्मात् विमर्शो नाम सङ्कल्पविकल्पात्मक एवेति ज्ञेयम्।

१६.१.५) सूक्ष्मशरीरम्

पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च वायवः, बुद्धिः मनश्चेति सप्तदशावयवाः मिलित्वा सूक्ष्मशरीरम् सृजन्ति। अतः सप्तदशावयवयुक्तानि सूक्ष्मशरीराणि इति कथ्यते। सूक्ष्मशरीरस्य अपरं नाम लिङ्गशरीरम्। लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भावः एभिः इति लिङ्गानि। लिङ्गानि च शरीराणि चेति लिङ्गशरीराणि। अस्यार्थः सूक्ष्मशरीरेण जीवात्मा लिङ्ग्यते ज्ञाप्यते इति कारणात् सूक्ष्मशरीरम् लिङ्गशरीरमिति अभिधीयते। सूक्ष्मशरीरविषये विद्यारण्यस्वामिना पञ्चदश्यां निगद्यते -

बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।

शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते॥ इति।

संक्षेपेण सृष्टिक्रमः अधः प्रदर्श्यते -

निर्गुणं ब्रह्म

--(माया/अज्ञानम्)

ईश्वरः (सोपाधिकं ब्रह्म)

▼

आकाशः ► वायुः ► अग्निः ► आपः ► पृथिवी (सूक्ष्मभूतानि)

--(पञ्चीकरणम्)

▼ ▼ ▼ ▼ ▼ ▼

पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च स्थूलभूतानि, पञ्च वायवः, मनः, बुद्धिः

पाठगतप्रश्नाः-१

१. पञ्चभूतानां सृष्टिप्रतिपादिका तैत्तिरीयश्रुतिः का।

२. अज्ञानोपहितात् चैतन्यात् प्रथमं किम् भूतम् उत्पद्यते।

क) वायुः ख) आकाशः ग) जलम् घ) तेजः

३. पञ्च ज्ञानेन्द्रियाणि कानि।

४. पञ्च कर्मेन्द्रियाणि कानि।

५. पञ्च वायवः के।

६. ज्ञानेन्द्रियाणि उत्पद्यन्ते -

क) सूक्ष्मभूतानां सात्त्विकांशेभ्यः ख) सूक्ष्मभूतानां रजोंऽशेभ्यः ग) सूक्ष्मभूतानां तमोंऽशेभ्यः

७. कर्मेन्द्रियाणि उत्पद्यन्ते -

क) सूक्ष्मभूतानां सात्त्विकांशेभ्यः ख) सूक्ष्मभूतानां रजोंऽशेभ्यः ग) सूक्ष्मभूतानां तमोंऽशेभ्यः

८. उदानो नाम कः।

९. अन्तःकरणम् उत्पद्यते -

क) सूक्ष्मभूतानां मिलितेभ्यः सात्त्विकांशेभ्यः ख) सूक्ष्मभूतानां मिलितेभ्यो रजोंऽशेभ्यः
ग) सूक्ष्मभूतानां मिलितेभ्यः तमोंऽशेभ्यः घ) सूक्ष्मभूतानां पृथक् पृथक् सात्त्विकांशेभ्यः

१०. अद्वैतमते सूक्ष्मशरीरे कति अवयवाः विद्यन्ते।

क) एकादश ख) त्रयोदश ग) सप्तदश घ) षोडशः

११. सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः -

क) मनः ख) बुद्धिः ग) चित्तम् घ) अहङ्कारः

१२. निश्चयात्मिका अन्तःकरणवृत्तिः -

क) मनः ख) बुद्धिः ग) चित्तम् घ) अहङ्कारः

१३. प्राणो नाम कः।

१४. जृम्भणकरः वायुः कः।

१६.२) भूतसृष्टिक्रमे विरोधपरिहारः, आकाशस्य उत्पत्तिविचारश्च

पञ्चभूतानि अज्ञानोपहितात् चैतन्यादुत्पद्यते इति पूर्वमुक्तम्। परन्तु इदानीं पञ्चभूतानां मध्ये कस्योत्पत्तिरादौ इति विषये विचारणा प्रवर्तते। तत्रादौ आकाशः उत्पद्यते न वेति प्रश्नः पूर्वपक्षिणः। छान्दोग्योपनिषदि 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा. उ. ६.२.१) इति सच्छब्दवाच्यं ब्रह्म प्रकृत्य 'तदैक्षत' 'तत्तेजोऽसृजत' (छा. उ. ६.२.३) इति च पञ्चानां महाभूतानां मध्यमं तेज आदि कृत्वा त्रयाणां तेजोबन्नानामुत्पत्तिः श्राव्यते। श्रुतिर्हि अतीन्द्रियार्थप्रतिपत्तौ अस्माकं प्रमाणम्। छान्दोग्यश्रुत्या आकाशस्योत्पत्तिः न प्रतिपाद्यते इत्यतः नास्त्येव आकाशस्योत्पत्तिरिति चेन्न, अस्ति हि उत्पत्तिश्रुतिराकाशस्य। तथाहि तैत्तिरीयोपनिषदि "सत्यं ज्ञानमनन्तं ब्रह्म" (२.१.१) इति प्रकृत्य, "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" (२.१.१) इति आत्मनः आकाशोत्पत्तिः वर्णिता।

ननु तर्हि प्राप्नोति श्रुत्योर्विप्रतिषेधः — क्वचित्तेजःप्रमुखा सृष्टिः, क्वचिदाकाशप्रमुखेति। एकवाक्यता तु अनयोः श्रुत्योर्युक्ता। अपि च, "तत्तेजोऽसृजत" इति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन सम्बन्धः न उपपद्यते - "तत्तेजोऽसृजत" "तदाकाशमसृजत" इति। ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयेन सम्बन्धो दृश्यते — यथा सूपं पक्त्वा ओदनं पचतीति, एवं तदाकाशं सृष्ट्वा तत्तेजोऽसृजत

इति योजयिष्यामि; नैवं युज्यते; प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते; तैत्तिरीयके च आकाशस्य; न च उभयोः प्रथमजत्वं सम्भवति। किञ्च, छान्दोग्ये सदाख्यात् आत्मनः तेजसः सृष्टिः समाम्नाता, तैत्तिरीयके तु "वायोरग्निः" इति वायुरेव तेजसः उपादानत्वेन वर्णित इत्यपि श्रुतिविरोधः।

ननु छान्दोग्यश्रुतेरेव ज्ञायते यत् नास्ति वियत उत्पत्तिः। अतः या वियदुत्पत्तिवादिनी श्रुतिः विद्यते सा सर्वापि गौणत्वेन अवगम्या। कस्मादिति चेत् असम्भवादेव। न ह्याकाशस्योत्पत्तिः सम्भावयितुं शक्या। नैयायिकानां मते हि कारणसामग्र्यः एव कार्यं जनयितुं शक्याः। कारणसामग्र्यभावात् आकाशस्योत्पत्तिः नैव शक्यते सम्भावयितुम्। समवाय्यसमवायिनिमित्तकारणेभ्यो हि सर्वमुत्पद्यमानं समुत्पद्यते; द्रव्यस्य चैकजातीयकमनेकं च द्रव्यं समवायिकारणं भवति; न चाकाशस्य एकजातीयकम् अनेकं च द्रव्यमारम्भकमस्ति; यस्मिन्समवायिकारणे सति, असमवायिकारणे च तत्संयोगे, आकाश उत्पद्येत। समवाय्यसमवायिकारणाभावात्तु तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेव आकाशस्य भवति। अपि च, उत्पत्तिमतां च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः सम्भाव्यते — प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव, पश्चाच्च भवतीति। आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यते। किं हि प्रागुत्पत्तेः अनवकाशम् अच्छिद्रं बभूवेति शक्यतेऽध्यवसातुम्। पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणात् आकाशस्य अजत्वसिद्धिः। तस्माद्यथा लोके 'आकाशं कुरु', 'आकाशो जातः' इत्येवंजातीयको गौणः प्रयोगो भवति, यथा च - घटाकाशः, करकाकाशः, गृहाकाशः इत्येकस्याप्याकाशस्य एवंजातीयको भेदव्यपदेशो गौणो भवति तद्वत् श्रुतौ आकाशस्योत्पत्तिः गौणतया द्रष्टव्या। श्रुतिरपि आकाशस्य नित्यत्वं श्रावयति। तथाहि - "वायुश्चान्तरिक्षं चैतदमृतम्" (बृ. उ. २.३.३) इति, "आकाशवत्सर्वगतश्च नित्यः" (शतपथब्राह्मणम् १०.६.३.२) इति च। न हि अमृतस्य नित्यस्य च उत्पत्तिः अभ्युपगन्तुं शक्यते। अतः नास्ति आकाशस्योत्पत्तिरिति चेदुच्यते सिद्धान्तिना - अस्ति हि आकाशस्य उत्पत्तिः।

आकाशस्य उत्पत्त्यनभ्युपगमे प्रतिज्ञाहानिः स्यात्। आत्मविज्ञानेन सर्वविज्ञानं भवतीति प्रतिवेदान्तं प्रतिज्ञा क्रियते। तथाहि श्रुतयः - "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" (छा. उ. ६.१.३) इति, "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्" (बृ. उ. ४.५.६) इति, "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" (मु. उ. १.१.३) इति। ब्रह्मणः यदि आकाशस्योत्पत्तिः न स्यात्तर्हि ब्रह्मविज्ञानेन आकाशविज्ञानं न स्यादिति एकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतिज्ञा हीयेत। छान्दोग्योपनिषदि "येनाश्रुतं श्रुतं भवति" इति प्रतिज्ञाय, मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते; तत्साधनायैव चोत्तरे शब्दाः "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा. उ. ६.२.१) "तदैक्षत" "तत्तेजोऽसृजत" (छा. उ. ६.२.३) इत्येवं कार्यजातं ब्रह्मणः प्रदर्श्य, अव्यतिरेकं प्रदर्शयन्ति "ऐतदात्म्यमिदं सर्वम्" (छा. उ. ६.८.७) इत्यारभ्य आ प्रपाठकपरिसमाप्तेः; तद्यद्याकाशं न ब्रह्मकार्यं स्यात्, न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत। ततश्च प्रतिज्ञाहानिः स्यात्; न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्तुम्। तथा हि प्रतिवेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापयन्ति "इदं सर्वं यदयमात्मा" (छा. उ. २.४.६) "ब्रह्मैवेदममृतं पुरस्तात्" (मु. उ. २.२.१२) इत्येवमादयः; तस्माद् अग्न्यादिवदेव गगनमप्युत्पद्यते।

यदुक्तं पुनः - छान्दोग्ये आकाशस्य उत्पत्त्यश्रवणात् न आकाशस्य उत्पत्तिः विद्यते इति तदयुक्तम् तैत्तिरीयोपनिषदि आकाशोत्पत्तेः दर्शितत्वात् - "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" (तै. उ. २.१.१) इति। ननु सत्यं दर्शितम्, परन्तु विरुद्धं तत् "तत्तेजोऽसृजत" इत्यनेन श्रुत्यन्तरेण; इति चेन्न एकवाक्यत्वात् सर्वश्रुतीनाम्। ननु भवतु तावत् एकवाक्यत्वम् अविरुद्धानाम्; इह तु विरोध उक्तः। सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन सम्बन्धः न सम्भवति, द्वयोश्च प्रथमजत्वं न सम्भवति, आकाशं सृष्ट्वा तेजः ससर्ज इति विकल्पोऽपि न सम्भवति इति सन्ति विरोधाः। अतः एकवाक्यत्वं नैव सम्भवतीति चेन्न, "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः" इति तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् सम्भवत्येव एकवाक्यत्वं श्रुतयोः। अशक्या हीयं तैत्तिरीयश्रुतिः अन्यथा परिणेतुम्; शक्या तु परिणेतुं छान्दोग्यश्रुतिः - तदाकाशं वायुं च सृष्ट्वा "तत्तेजोऽसृजत" इति। न हीयं छान्दोग्यश्रुतिः तेजोजनिप्रधाना सती श्रुत्यन्तरप्रसिद्धाम् आकाशस्योत्पत्तिं वारयितुं शक्नोति, एकस्य वाक्यस्य व्यापारद्वयासम्भवात्; स्रष्टा त्वेकोऽपि क्रमेण अनेकं स्रष्टव्यं सृजेदिति एकवाक्यत्वकल्पनायां सम्भवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या। किञ्च, सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसम्बन्धो न सम्भवतीति यदुक्तं तन्न सङ्गतम्, श्रुतौ ब्रह्मण एव सर्वं सृज्यते इति एकस्मात् स्रष्टुः सर्वसृष्ट्युपदेशात्। एवम् आकाशस्य तेजसश्च ब्रह्मजत्वात् श्रुतिः न श्रुत्यन्तरविहितं तेजःप्रमुखम् उत्पत्तिक्रमं वारयति, न च श्रुत्यन्तरविहितं नभःप्रमुखम् उत्पत्तिक्रमं वारयितुमर्हति। अपि च "तत्तेजोऽसृजत" इति नात्र क्रमस्य वाचकः कश्चिच्छब्दोऽस्ति; अर्थात्तु क्रमो गम्यते; स च "वायोरग्निः" (तै. उ. २.१.१) इत्यनेन श्रुत्यन्तरप्रसिद्धेन क्रमेण निवार्यते। किञ्च, आकाशस्य प्रथमजत्वाभ्युपगमे आकाशं सृष्ट्वा तेजः सृजति इति विकल्पोऽपि सुतरां सङ्गच्छते इति नास्ति श्रुत्योर्विप्रतिषेधः।

यत्तूक्तं समानजातीयमनेकं कारणद्रव्यम् आकाशस्य नास्तीति, तत्प्रत्युच्यते - न तावत्समानजातीयम् एवारभते, न भिन्नजातीयमिति नियमोऽस्ति। न हि तन्तूनां तत्संयोगानां च समानजातीयत्वमस्ति, तन्तोः द्रव्यत्वात्, संयोगस्य च गुणत्वात्; न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। ननु समवायिकारणविषय एव समानजातीयत्वाभ्युपगमः, न कारणान्तरविषय इति चेत् तदपि अयुक्तम्; सूत्रगोवालैः हि अनेकजातीयैः एका रज्जुः सृज्यमाना दृश्यते; तथा सूत्रैः ऊर्णादिभिश्च विचित्रान्कम्बलान्वितन्वते। ननु द्रव्यत्वं सत्त्वं च उभयत्रापि समानमिति सजातीयत्वमिति चेत् तथा सति सजातीयत्वाभ्युपगमः व्यर्थः, सर्वस्य सर्वेण समानजातीयत्वात्।

नापि अनेकमेवारभ्यते, नैकम् इति नियमोऽस्ति, अणुमनसोः आद्यकर्मारम्भाभ्युपगमात्। एकैको हि परमाणुर्मनश्चाद्यं कर्मारभते, न द्रव्यान्तरैः संहत्य इत्यभ्युपगम्यते नैयायिकैः। ननु द्रव्यारम्भे एव अनेकारम्भकत्वनियम इति चेन्न, परिणामाभ्युपगमात्। भवेदेष नियमः — यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्य आरम्भकम् अभ्युपगम्येत; तदेव तु द्रव्यं विशेषवदवस्थान्तरम् आपद्यमानं कार्यं नाम अभ्युपगम्यते; तच्च क्वचिदनेकं परिणमते मृद्बीजादि अङ्कुरादिभावेन; क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन। तस्मात् नेश्वरशासनमस्ति यद् अनेकमेव कारणं कार्यं जनयतीति।

यदपि उक्तं श्रुतौ आकाशस्य नित्यत्वाभ्युपगमात्, अमृतत्वकथनाच्च नास्ति उत्पत्तिः इति तदपि अयुक्तम्। आसृष्टिप्रलयान्तं हि आकाशस्य नित्यत्वम्। प्रलये तु आकाशस्यापि नाशो भवति।

तस्मात् परमार्थतः अनित्यत्वमेव आकाशस्य। यद् यद् उत्पद्यते तत् सर्वम् अनित्यमिति नियमात् आकाशस्यापि उत्पत्तिश्रवणात् अनित्यमिति ज्ञेयम्। न हि आकाशस्य सृष्टिश्रुतिः गौणी इति शक्यते अभ्युपगन्तुम्, तदभ्युपगमे कारणाभावात्, प्रतिज्ञाहानेश्चेति उपपादितं पूर्वम्। अतः अस्ति आकाशस्य उत्पत्तिः इति उपपन्नम्। एवम् ब्रह्मणः आकाशस्य, आकाशात् वायोः, वायोः तेजसः, तेजसः अपां, अद्भ्यः पृथिव्याः च सृष्टिः भवतीति क्रमः अनुसन्धेयः। ननु आत्मनः तेजसः उत्पत्तिः छोन्दोग्ये आम्नायते, इह तु वायोः तेजसः उत्पत्तिः इति असङ्गतमिति चेन्न, सृष्टिक्रमे सर्वत्रापि आत्मभावापन्नादिति अनुवृत्तिः कर्तव्या, अन्यथा अचेतनात् अचेतनस्य उत्पत्तिः अपरिहर्तव्या स्यात्। तेन आत्मभावापन्नाद् वायोः तेजसः उत्पत्तिः जातेति नास्ति असामञ्जस्यं किञ्चित्।

पाठगतप्रश्नाः-२

१५. कस्याम् उपनिषदि तेजःप्रमुखा सृष्टिः प्रतिपाद्यते।

क) तैत्तिरीयोपनिषदि ख) कठोपनिषदि ग) बृहदारण्यकोपनिषदि घ) छान्दोग्योपनिषदि

१६. कस्यामुपनिषदि आकाशप्रमुखा सृष्टिः प्रतिपाद्यते।

क) तैत्तिरीयोपनिषदि ख) कठोपनिषदि ग) बृहदारण्यकोपनिषदि घ) छान्दोग्योपनिषदि

१७. अद्वैतसिद्धान्ते आकाशस्य उत्पत्तिरस्ति न वा।

१८. आकाशस्य नित्यत्वं कथं सङ्गच्छते।

१६.३) पञ्चीकरणम्–

अपञ्चीकृतानि पञ्च सूक्ष्मभूतानि पञ्चीकरणप्रक्रियया त्रिवृत्करणप्रक्रियया वा स्थूलताम् अवाप्य पञ्च स्थूलभूतरूपेण परिणतानि। ततः एव वस्तुतः कृत्स्नः स्थूलः प्रपञ्चः आविर्भवति। तस्मात् सृष्टिविचारप्रसङ्गे पञ्चीकरणम् अपि ज्ञातव्यम्। सृष्टिसमये अनुक्रमेण उत्पन्नानि अपञ्चीकृतानि सूक्ष्मभूतानि व्यवहारसमर्थानि न भवन्ति इति कारणात् तानि एव भूतानि पञ्चीकृतानि भवन्ति। इदानीं पञ्चीकरणप्रक्रिया विस्तार्यते।

आकाशः वायुः तेजः आपः पृथिवी च पञ्च स्थूलभूतानि। एतानि भूतानि प्रत्येकं द्विधा विभज्यते। ततः परं दश भागाः प्राप्यन्ते। पुनः तेषु दशसु भागेषु प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्धा विभज्यते। पुनः तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् एव पञ्चीकरणम्। उच्यते च वेदान्तसारकारेण - "पञ्चीकरणं तु आकाशादिपञ्चसु एकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम्।" इति। तथाहि उच्यते पञ्चदश्याम् -

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः।

स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते॥ इति।

सुरेश्वराचार्यैः पञ्चीकरणं वेशद्येन उच्यते -

पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा।

एकैकं भागमादाय चतुर्धा विभजेत् पुनः॥

एकैकं भागमेकस्मिन् भूते संवेशयेत् क्रमात्।

ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि॥

वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत्।

पञ्चीकरणमेतत् स्यादित्याहुस्तत्त्ववेदिनः॥ इति।

वस्तुतः पञ्चीकरणं नाम पञ्चभूतानां परस्परसंमिश्रणम्। ईश्वरेच्छया भोगायतनानां स्थूलशरीराणां सृष्टये पञ्चीकरणं सम्भवति। पञ्चीकरणकारणात् सर्वेषु भूतेषु सर्वेषां भूतानाम् अंशः विद्यते इत्यतः कथम् एकस्मिन् भूते आकाशादिव्यपदेशः स्यादिति चेदुच्यते - यस्मिन् यस्य भूतस्य अंशः अधिकः तिष्ठति तद्भूतं तन्नाम्ना एव व्यपदिश्यते। तथाहि न्यायो - 'वैशेष्यात्तु तद्वादस्तद्वादः' इति। अस्यार्थः - यस्मिन् यस्य विशेषः अर्थाद् आधिक्यमस्ति तमाश्रित्यैव व्यपदेशः भवतीति। तस्माद् आकाशे तदीयांशस्य आधिक्यवशाद् आकाश इति व्यवहारः सिध्यति। एवम् अन्येषु भूतेष्वपि द्रष्टव्यम्।

पञ्चीकृतभूतानाम् अंशाः

पञ्चीकृतभूतानि	आकाशः	वायुः	तेजः	जलम्	पृथिवी
१ आकाशः =	**१/२**	१/८	१/८	१/८	१/८
१ वायुः =	१/८	**१/२**	१/८	१/८	१/८
१ तेजः =	१/८	१/८	**१/२**	१/८	१/८
१ जलम् =	१/८	१/८	१/८	**१/२**	१/८
१ पृथिवी =	१/८	१/८	१/८	१/८	**१/२**

पञ्चीकरणात् स्थूलभूतोत्पत्तेरनन्तरम् आकाशे शब्दः अभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धाः अभिव्यज्यन्ते।

अस्य पञ्चीकरणस्य अप्रामाण्यं न आशङ्कनीयम्। अस्ति हि छान्दोग्यश्रुतिः त्रिवृत्करणस्य प्रामाण्याय - “तासां त्रिवृतं त्रिवृतम् एकैकं करवाणि” इति। त्रिवृत्करणं नाम तेजसः आपः पृथिव्याः च विशेषनियमेन संमिश्रणम्। पञ्चीकरणवदेव एषा प्रक्रिया। एषैव त्रिवृत्करणश्रुतिः पञ्चीकरणस्य ज्ञापिका

भवति। अतः एव सदानन्दयोगीन्द्रेण वेदान्तसारे उच्यते - "अस्य अप्रामाण्यं न आशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्यापि उपलक्षणत्वात्" इति।

एवं पञ्चीकरणाद् अनन्तरं व्यवहारयोग्यानि स्थूलभूतानि उत्पद्यन्ते। एतेभ्यः पञ्चीकृतभूतेभ्यः चतुर्दश भुवनानि लोकाः वा उत्पद्यन्ते। तानि हि भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम् इति सप्त क्रमेण ऊर्ध्वलोकाः। सप्त च क्रमेण अधोलोकाः अतल-वितल-सुतल-रसातल-तलातल-महातल-पातालाः इति। न केवलं चतुर्दशभुवनानाम्, अस्य ब्रह्माण्डस्य, ब्रह्माण्डान्तर्गतानां च चतुर्विधस्थूलशरीराणाम् अन्नपानादीनां च उत्पत्तिरपि पञ्चीकृतभूतेभ्यो जायते। जरायुजं स्वेदजम् अण्डजम् उद्भिज्जं चेति चतुर्विधानि स्थूलशरीराणि। जरायुभ्यः जातानि मनुष्यपश्वादीनि जरायुजानि। अण्डेभ्यः जातानि पक्षिसर्पादीनि अण्डजानि। स्वेदेभ्यः जातानि यूकमशकादीनि स्वेदजानि। मृत्तिकाम् उद्भिद्य जातानि लतावृक्षादीनि उद्भिज्जानि। इत्थं पञ्चभूतानां समुत्पत्तिः, तेभ्यः भूतेभ्यः भौतिकानां च समुत्पत्तिः।

१६.४) प्रलयविचारः–

१६.४.१) नित्यप्रलयः

प्रलयः नाम त्रैलोक्यनाशः। प्रलयः चतुर्विधः - नित्यः प्राकृतः नैमित्तिकः आत्यन्तिकः च। नित्यप्रलयः नाम सुषुप्तिः। यस्याम् अवस्थायां सुप्तः पुरुषः न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति सा सुषुप्त्यवस्थेति कथ्यते।नित्यं हि जीवाः सुषुप्तिं गच्छन्ति इति कारणात् सुषुप्तिर्हि नित्यप्रलयः। तस्यां सुषुप्तौ पुरुषः परेण ब्रह्मणा सह ऐकात्म्यं प्राप्नोति, तेन च अखिलकार्याणि विनाशम् आप्नुवन्ति। ननु सुषुप्तौ प्राणस्पन्दनं तिष्ठतीत्यतः अखिलकार्यविनाशः नैव भवतीति चेदुच्यते अन्तःकरणस्य द्वे शक्ती स्तः। ज्ञानशक्तिः क्रियाशक्तिः चेति। ज्ञानशक्तिविशिष्टस्य अन्तःकरणस्य सुषुप्तौ नाशः भवति। किन्तु क्रियाशक्तिविशिष्टस्य अन्तःकरणस्य नाशः न भवतीति कारणात् प्राणः तस्यामवस्थायां तिष्ठति एवेति अद्वैतिनां मतम्। क्रियाशक्तिविशिष्टस्य अन्तःकरणस्य तु नाशः शरीरविनाशे भवति। सुषुप्तौ प्राणः जागर्ति इत्यत्र श्रुतिप्रमाणं हि - "यदा सुप्तः न कञ्चन स्वप्नं पश्यति, अथास्मिन् प्राण एव एकधा भवति, अथैनं वाक् सर्वैर्नामभिः सहाप्यति" (कौषितक्युपनिषत्-३/२) इति। सुषुप्तौ सत्सम्पन्नत्वात् सर्वम् विनाशं गच्छतीत्यत्र छान्दोग्यश्रुतिर्हि - "सता सौम्य तदा सम्पन्नो भवति स्वमपीतो भवति"(६/८/१) च इति।

१६.४.२) प्राकृतप्रलयः

प्राकृतप्रलयः नाम हिरण्यगर्भविनाशनिमित्तकः अखिलकार्यानां नाशः। हिरण्यगर्भः अशेषब्रह्माण्डस्य अधिकारी प्रथमः जीवः। ब्रह्मणः अपरोक्षज्ञानत्वात् स जीवन्मुक्तः इति उच्यते। ब्रह्मापरोक्षज्ञाने सत्यपि तस्य प्रारब्धकर्मणः नाशः न अभवत्। अतः स जीवन्मुक्तः कथ्यते। यदा तस्य प्रारब्धकर्मणः अशेषतया विनाशः भवति तदा तस्य विदेहमुक्तिः भवति। तत्र प्रमाणभूता श्रुतिर्हि -

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मनः प्रविशन्ति परं पदम्॥ इति।

प्राकृतप्रलये पुराणवचनं तावत् -

द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।
तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयेते॥ इति।

१६.४.३) नैमित्तिकप्रलयः

कार्यब्रह्मणः हिरण्यगर्भस्य दिवसावसाननिमित्तकः त्रैलोक्यमात्रनाशः नैमित्तिकः प्रलयः कथ्यते। चतुर्युगसहस्राणि ब्रह्मणः दिनमुच्यते। नैमित्तिकप्रलये पुराणवचनं तावत् -

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्।
शेते अनन्तासने नित्यमात्मसात्कृत्य चाखिलम्॥ इति।

१६.४.४) आत्यन्तिकप्रलयः

ब्रह्मसाक्षात्कारकारणात् अशेषमोक्षः एव आत्यन्तिकः प्रलयः कथ्यते। आत्यन्तिकप्रलयस्य अपरं नाम तुरीयप्रलयः। "सर्वे एकीभवन्ति" इति श्रुतिरत्र मानम्। येन क्रमेण भूतानां भौतिकानां च सृष्टिः भवति तद्विपरीतक्रमेण लयः भवति। यथा पृथिव्याः अप्सु लयः भवति। अपां तेजसि, तेजसः वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य जीवाहङ्कारस्य हिरण्यगर्भाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारस्य अविद्यायां लयः भवति। विष्णुपुराणे निगदितम् अस्ति यत्

जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयते॥ इति।

यादृशो वा प्रलयः अस्तु नाम सर्वः एव व्युत्क्रमेण भवति अर्थात् येन क्रमेण सृष्टिः तद्विपरीतक्रमेण प्रलयः। प्रलये कार्याणि कारणभावं प्राप्नुवन्ति। तथाहि भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकम् एतदायनतभूतानि भूरादिरचतुर्दशभुवनानि, एतदायतनभूतं ब्रह्माण्डं चैतत् सर्वम् एतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति। शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि, ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, वायवः, अन्तःकरणं चैतत् सर्वम् एतेषां कारणरूपम् अपञ्चीकृतभूतमात्रं भवति। एतानि सत्त्वादिगुणसहितानि अपञ्चीकृतानि भूतानि एतत्कारणभूतम् अज्ञानोपहितचैतन्यमात्रं भवति। एतद् अज्ञानम् अज्ञानोपहितं चैतन्यं च ईश्वरादिकम् एतदाधारभूतम् अनुपहितचैतन्यरूपम् निर्विशेषं निर्गुणं ब्रह्ममात्रं भवति। आत्यन्तिकप्रलये तु ब्रह्म स्वस्वरूपमात्रेण विराजते।

पाठगतप्रश्नाः-३

१९. किं नाम पञ्चीकरणम्।

२०. पञ्चीकरणप्रतिपादकः पञ्चदशीश्लोकः कः।

२१. पञ्चीकृते वायौ वायोः कियान् अंशः तिष्ठति।

२२. चतुर्दशभुवनानि कानि।

२३. चतुर्विधानि स्थूलशरीराणि कानि।

२४. प्रलयः कतिविधः। के च ते।

२५. नित्यप्रलयः नाम कः।

२६. आत्यन्तिकप्रलयः नाम कः।

पाठसारः

सर्वेषां दर्शनानामिव अद्वैतवेदान्तिनां सृष्टिक्रमः इति वेदितव्यः। अद्वैतवेदान्तमते अज्ञानोपहितात् चैतन्यात् आकाशस्य, ततः वायोः, ततः अग्नेः, ततः आपः, ततश्च पृथिव्याः समुत्पत्तिरभूत्। एतानि सूक्ष्माणि भूतानि व्यवहारासमार्थानि अपञ्चीकृतभूतानि इत्युच्यन्ते। एतेभ्यः अपञ्चीकृतेभ्यः पञ्चसूक्ष्मभूतेभ्यः पञ्चीकरणप्रक्रियया पञ्च स्थूलभूतानि, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च वायवः, बुद्धिः मनश्चेति उत्पद्यन्ते। ननु किं नाम पञ्चीकरणमिति चेदुच्यते - पञ्चीकरणं नाम एका प्रक्रिया, यया प्रत्येकं भूतानाम् द्वितीयांशः अन्येषां चतुर्णां भूतानां अष्टमांशेन मिलित्वा एकं पूर्णं व्यवहारयोग्यं स्थूलभूतं निर्माति। ज्ञानेन्द्रियाणि आकाशादीनां पृथक् पृथक् सात्त्विकांशेभ्यः क्रमेण उत्पद्यन्ते। कर्मेन्द्रियाणि आकाशादीनां पृथक् पृथक् रजोंऽशेभ्यः क्रमेण उत्पद्यन्ते।पञ्च वायवः आकाशादीनां रजोंऽशेभ्यः मिलितेभ्यः उत्पद्यन्ते। आकाशादीनां सात्त्विकांशेभ्यः मिलितेभ्यः अन्तःकरणम् उत्पद्यते। अन्तःकरणस्यैव वृत्तिभेदेन बुद्धिः मनः चित्तम् अहङ्कारः इति चतुर्धा विभागः। पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च वायवः, बुद्धिः मनश्चेति सप्तदशावयवोपेतं सूक्ष्मशरीरम्। तस्य अपरं नाम लिङ्गशरीरमिति। यद्यपि नैयायिकानां नये आकाशः नित्यः तथापि वेदान्तिनां मते आकाशः ब्रह्मणः उत्पद्यते अर्थात् अनित्यः इति अङ्गीक्रियते। येन क्रमेण सृष्टिः प्रतिपाद्यते अद्वैतिभिः तद्विपरीतक्रमेण प्रलयम् अङ्गीकुर्वन्ति ते। प्रलयो नाम त्रैलोक्यविनाशः। स च नित्य-प्राकृत-नैमित्तिकात्यन्तिकभेदेन चातुर्विध्यं भजते। एतेषु ब्रह्मसाक्षात्कारेण अशेषप्रपञ्चविनाशः आत्यन्तिकप्रलयः इत्युच्यते।

पाठान्तप्रश्नाः

१. सृष्टिक्रमविषये लघुटिप्पणीमेकां लिखत।

२. सप्तदशावयवविशिष्टस्य लिङ्गशरीरस्य परिचयः दीयताम्।

३. मिलितानां सूक्ष्मभूतानां कार्याणि संक्षेपेण लिखत।

४. पञ्चीकरणप्रक्रियां विस्तरेण प्रतिपाद्यताम्।

५. अद्वैतवेदान्तमते आकाशस्य उत्पत्तिः सम्भवति न वेति विचारयत।

६. चतुर्विधप्रलयानां संक्षेपेण परिचयः दीयताम्।

पाठगतप्रश्नानाम् उत्तराणि

पाठगतप्रश्नाः-१

१. "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्।" इति।

२. ख) आकाशः

३. श्रोत्रं, चक्षुः, त्वक्, जिह्वा, घ्राणं च इति पञ्च ज्ञानेन्द्रियाणि।

४. वाक्, पाणिः, पादः, पायुः, उपस्थः चेति पञ्च कर्मेन्द्रियाणि।

५. प्राणः, अपानः, व्यानः, उदानः, समानः चेति पञ्च वायवः।

६. क) सूक्ष्मभूतानां सात्त्विकांशेभ्यः।

७. ख) सूक्ष्मभूतानां रजोंऽशेभ्यः।

८. उदानो नाम कण्ठस्थानीयः ऊद्ध्र्वगमनवान् उत्क्रमणवायुः।

९. क) सूक्ष्मभूतानां मिलितेभ्यः सात्त्विकांशेभ्यः

१०. ग) सप्तदश।

११. क) मनः।

१२. ख) बुद्धिः।

१३. प्राणो नाम प्राग्गमनवान् वायुः नासाग्रवर्ती।

१४. देवदत्तः

पाठगतप्रश्नाः-२

१५. घ) छान्दोग्योपनिषदि।

१६. क) तैत्तिरीयोपनिषदि।

१७. आकाशस्य उत्पत्तिरस्ति।

१८. प्रयत्नपर्यन्तं हि आकाशस्य नित्यत्वमिति नित्यता सङ्गच्छते।

पाठगतप्रश्नाः-३

१९. व्यवहारासमर्थानां पञ्च सूक्ष्मभूतानां परस्परसंमिश्रणेन व्यवहारयोग्य-स्थूलभूतोत्पत्तिप्रक्रिया एव पञ्चीकरणम्।

२०. द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते॥ इति।

२१. १/२।

२२. भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम् इति सप्त ऊर्द्ध्वलोकाः, अतल-वितल-सुतल-रसातल-तलातल-महातल-पातालाः इति सप्त च अधोलोकाः इति चतुर्दश भुवनानि।

२३. जरायुजं स्वेदजम् अण्डजम् उद्भिज्जं चेति चतुर्विधानि स्थूलशरीराणि।

२४. प्रलयः चतुर्विधः। नित्यः प्राकृतः नैमित्तिकः आत्यन्तिकः चेति।

२५. नित्यप्रलयः नाम सुषुप्तिः।

२६. ब्रह्मसाक्षात्कारकारणात् अशेषमोक्षः एव आत्यन्तिकः प्रलयः।

॥ इति षोडशः पाठः ॥